दिनाङ्क :- 27.11.2025

प्रातः - 06:55

**प्रधानमन्त्री-स्काईरूट**

प्रधानमन्त्री श्रीनरेन्द्र-मोदी अद्य प्रातः एकादश-वादने दृश्य-सम्मेलनद्वारा भारतीय अंतरिक्ष-स्टार्ट-अप स्काईरूट इत्यस्य इन्फिनिटी परिसरस्य उद्घाटनं करिष्यति। प्रधानमन्त्री स्काईरूट्-संस्थायाः प्रथम-कक्षा-उपग्रहस्य विक्रम-प्रथम इत्यस्यापि अनावरणं करिष्यति यस्मिन् कक्षायां उपग्रहान् प्रक्षेपयितुं क्षमता वर्तते। अत्याधुनिक-सुविधायां बहुविध-प्रक्षेपणवाहनानां विन्यासं, विकासं, एकीकरणं, परीक्षणं च कर्तुं प्रायः द्वि-लक्ष-वर्गफीट् परिमितं कार्यस्थानं भविष्यति, यत्र प्रतिमासं एकस्य कक्षीय-उपग्रहस्य निर्माण-क्षमता भविष्यति। स्काईरूट् इति भारतस्य प्रमुखा निजी-अन्तरिक्ष-संस्था अस्ति, यस्याः स्थापकौ, भारतीय-प्रौद्योगिकी-संस्थायाः पूर्वविद्यार्थिनौ, इसरो इत्यस्य पूर्ववैज्ञानिकौ पवन-चन्दनः, भरत-ढाका च स्तः।

**प्रीज - ओडिशा/उत्तरयात्रा :**

राष्ट्रपति द्रौपदी मुर्मूः अद्य आरभ्य ओडिशा-उत्तरप्रदेशयोः द्विदिवसीययात्रायां भविष्यति । सा अद्य भुवनेश्वरे ओडिशाविधानसभायाः सदस्यान् सम्बोधयिष्यति । राष्ट्रपतिः श्वः लखनऊनगरे ऐषमः ब्रह्मकुमारीणां वार्षिक-विषयस्य "विश्व-एकतायै-विश्वासाय च ध्यानम्" इस्यस्य विमोचन-समारोहस्य शोभां वर्धयिष्यति । तथा च लखनऊ-नगरे, राष्ट्रपतिः, भारतस्काउट्-गाइड्स्-समूहस्य वज्र-महोत्सवस्य समापन-समारोहस्य शोभां च वर्धयित्वा, सम्बोधनं करिष्यति।

**राष्ट्रमण्डल-अहमेदाबाद::**

द्विसहस्राब्दस्य त्रिंशत्तम-वर्षस्य कामन्-वेल्थ् गेम्स् इति राष्ट्रमण्डलक्रीडा अहमदाबाद-नगरे भविष्यति । यूनाइटेड् किङ्गडम्-देशस्य ग्लास्गो-नगरे, महासभायां चतुस्सप्ततिः राष्ट्रमण्डल-देशानां प्रतिनिधिभिः अस्य निर्णयस्य अनुमोदनं कृत्वा आधिकारिकरूपेण अस्य निर्णयस्य उद्घोषः कृतः । प्रधानमन्त्री नरेन्द्रमोदी भारतस्य उक्तोपलब्धये देशवासिनां कृते अभिनन्दनं कृतवान् । उपराष्ट्रपतिः सीपी राधाकृष्णन् वर्यः एकस्मिन् अन्तर्जालीय-सन्देशे प्रसन्नतां प्रकटीकुर्वन् उक्तवान् यत्, एषः महत्त्वपूर्णः विकासः राष्ट्रस्य क्रीडा-पारिस्थितिकी-तन्त्रस्य सामूहिकशक्तिं, प्रतिभां, भावनां च प्रतिबिम्बयति ।

**विदेशमन्त्रालयः – पाकिस्तान**

भारतेन पाकिस्तानस्य सद्यः एव अयोध्यायाः श्रीराममन्दिरे ध्वज-स्थापन-समारोहस्य विषये कृतस्य टिप्पण्याः कृते आक्षेपः कृतः, यत् अन्येषां कृते उद्बोधनं कर्तुं प्रतिवर्तिदेशः नैतिकतां न स्थापयति । गतसायं, नवदिल्लीनगरे, वार्ताहरान् ज्ञापयन् विदेशमन्त्रालयस्य प्रवक्ता रणधीर-जयसवालः अवदत् यत्, भारतं तैः कृतटिप्पणीः नाङ्गीकरोति ।

अरुणाचलप्रदेशस्य एकस्य भारतीयनागरिकस्य शङ्घाई-विमानस्थानके निगडनस्य विषये, विदेशमन्त्रालयेन चीनदेशस्य कार्याणि प्रश्नीकृतानि । चीनदेशस्य विषये प्रश्नस्य उत्तरं यच्छन्, प्रवक्ता अवदत् यत्, अरुणाचलप्रदेशः भारतस्य अभिन्नः भागः अस्ति तथा च अस्य निर्विवाद-वास्तविकतायाः परिवर्तन-विषये चीनपक्षस्य यः कोऽपि पदक्षेपः अस्वीकार्यः एव ।

## रक्षा मंत्री राजनाथ सिंह

रक्षा मंत्री राजनाथ सिंहः अद्य नवदिल्लीनगरे, इन्डोनेशिया-देशस्य रक्षामन्त्री स्जाफ्री स्जामसो-द्दीन इत्यनेन सह तृतीयस्य भारत-इण्डोनेशिया-रक्षामन्त्रिणां संवादस्य सह-अध्यक्षतां करिष्यति । एकस्मिन् वक्तव्ये रक्षामन्त्रालयेन उक्तं यत्, द्वावपि मन्त्रिणौ क्षेत्रीयसुरक्षाविकासानां समीक्षां करिष्यतः, बहुपक्षीयविषयेषु चर्चां करिष्यतः, द्विपक्षीयरक्षासहकार्यं गभीरं कर्तुं नूतनक्षेत्राणां अन्वेषणं च करिष्यतः । अवधेयमस्ति यत्, इन्डोनेशिया-देशस्य रक्षामन्त्री नवम्बर् षड्विंशतितः सप्तविंशति-पर्यन्तं द्विदिनात्मकं भारत-यात्रायां वर्तते ।

## उत्तरप्रदेशे विशेषसघनपुनरीक्षण :

उत्तरप्रदेशे, सम्पूर्णे राज्ये, एस्.आई.आर् विशेष-सघन-पुनरीक्षणस्य प्रथमचरणस्य शीघ्रगत्या सम्पन्नं अभवत् । ग्रेटर नोएडा-नगरे आयोजिते कार्यक्रमे पूर्वकेन्द्रीयमन्त्री कलराजमिश्रः भागं गृहीतवान् । श्रावस्ती जिला निर्वाचन अधिकारी अश्विनी पाण्डेयेन उक्तं यत् ये बी.एल.ओ इति निर्वाचन-अधिकारिणः समये एव कार्यं सम्पन्नवन्तः तेषां सम्माननम् अपि करिष्यते ।